The MS. is said to have been copied by Taṭṭalūri Vēṅkaṭarāyalu for Vēṅkaṭarāju, the transcription having been completed on Wednesday, the 14th day of the dark fortnight of Kārttika in the year Nala, of Śālivāhana Śaka, 1770 (9 ?).

Foll. 193 and 194 contain Śrīraṅgēśatārāvalistōtra. Fol. 195 is left blank.

R. No. **1858.**

Palm-leaf. 19½ × 1⅜ inches. Foll. 82. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915-16 by Daṇḍu Kṛṣṇsmūrtigāru of Mandapeta, Rāmachandrapuram taluk, Gōdāvari district.

Foll. 1 and 2 are left blank.

प्रायश्चित्तशतद्वयीव्याख्या.

PRĀYAŚCITTAŚATADVAYĪVYĀKHYĀ.

Foll. 3*a*—54*a*. Fol. 54*b* is left blank.

By Bhāskara. Same work as that described under No. 1081 of the D.C.S. MSS., Vol. II, wherein see for the beginning

Contains the first five Paṭalas.

End:

यजमानो म्रियेत तत्स्मरणार्थं सर्वप्रायश्चित्तं जुहुयात्। स्मार्तकर्मभ्रेषे सर्ववेदभ्रेषे चेदं सर्वप्रायश्चित्तं बह्वृचब्राह्मणे चोक्तम् ॥

Colophon:

इति प्रायश्चित्तशतद्वयीव्याख्यायां पञ्चमः पटलः ॥

स्मार्तकर्मशातातपवचनम्—

क्लीबे देशान्तरस्थे च पतिते भिक्षुकेऽपि वा।

* * * *

पिता पितामहो यस्य अग्रजो वाथ कस्यचित्।

तपोऽग्निहोत्रमन्त्रेषु न दोषः परिवेदने॥

Colophon:

इति प्रायाश्चित्तशतद्वयीव्यवाख्यानं समाप्तम् ॥

Transcribed by Susarla Pāpaya Sōmayāji for Sītarāmadīkṣita, the transcription having commenced on Saturday, the 10th day of the dark fortnight of the month of Puṣya in the year Jaya, and completed on Saturday, the 5th day of the dark fortnight of the Puṣya month in the year Manmatha.

Foll. 55*a*—82*b* contain the Pūrvaprayōga of Āpastambasūtra.

R. No. **1859.**

Palm-leaf. 15¼ × 1¼ inches. Foll. 65. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Dēvulapalli Narasiṁha Śāstri of Mandapeta, Rāmachandrapuram taluk.

राघवयादवीयम्.

RĀGHAVAYĀDAVĪYAM.

A poem in 15 Sargas narrating the story of Rāma as contained in the six Kāṇḍas of the Rāmāyaṇa and the story of Kṛṣṇa as given in the tenth Skandha of the Bhāghavata, by means of stanzas each of which is capable of giving two meanings: by Sōmēśvara, son of Viñjimūri Kṛṣṇasūri of Gautamagōtra, a devotee of Rāma and Kṛṣṇa. The author proposes to use only the words used by Kālidāsa, Bhāravi, etc., and only those monosyllabic words which are mentioned in the Amarakōśa.

Complete.

Beginning:

श्रीमानघान्तोऽहिमभानुवंशवनीवसन्तः सदयः स रामः।
कृष्णो विदेहात्मजयान्वितोऽर्हो नेता कृतिं मे सफलीकरोतु ॥

जयत्यजस्रं परमोदकेऽच्छोऽविनायकोऽयः परमां जने यः।
क्षमां दधानः सशिवः स्वशक्त्यानन्दी स पायादतिमात्रमस्मान् ॥

आर्ये नमस्ते सुपरोक्तिबन्धकृतो रता सत्कविमण्डलस्य ।
अभीष्टदाने सकलस्य भूमौ सभासु वाक्त्वं भव लोकमातः ॥

व्यासं कणादं कपिलं च शास्त्रैस्तैः पाणिनिं जैमिनिमक्षपादम् ।
बुधा द्विवेदीकुलचन्द्र यं त्वां वदन्ति गोविन्दगुरो नमस्ते ॥

निर्मातुमर्थद्वययुक्तमेकं पद्यं ह्यशक्यं कविना सुखेन।
अहो कृतिं श्लेषमयीं विधातुकामस्य मे साहसमास कीदृक् ॥

प्रवर्तते रामकथान्तरे यो रसस्ततः कृष्णकथान्तरेऽन्यः ।
एवंविधास्ते बहुशोऽत्र यत्तत्काव्यस्य निर्माणमशक्यमस्य ॥

तथापि रामस्य कृपावलम्बात् कृष्णस्य चाश्चर्यकरं कवीनाम् ।
श्लिष्टं करिष्याम्यहमाशु काव्यं श्राव्यं सतां राघवयादवीयम् ॥

कथाश्च रामायणकाण्डषट्के वसन्ति या भागवतस्य भव्याः ।
स्कन्धे विचित्रा दशमे च तासां कुर्यामहं सङ्घटनां क्रमेण ॥

शब्दानहं भारविकालिदासमाघादिकाव्यप्रहितान् प्रयोक्ष्ये।
एकाक्षरांश्चामरकोशनिष्ठान् ध्रुवं न चैकाक्षरकोशनिष्ठान् ॥

क्षमा जगद्रामकथैव कृष्णकथापि वा कर्तुमिदं पवित्रम् ।
काव्येऽत्र गङ्गायमुने इव द्वे प्रयाग एते किमुताभियुक्ते॥

त्वं रामभूपालक राघवश्चेत्त्वं कृष्णभूपालक यादवश्चेत् ।
कथं प्रसिद्धिं बहुकालमुर्व्यां न प्राप्नुयाद्राघवयादवीयम् ॥

* * * *

साकेतनामा सहितार्यसङ्घा नानामहा भूरिवितानशाला।
पुरी वरा द्यौरिव भात्ययोध्याभिख्यान्तरा मामधुरा धरायाम् ॥

* * * *

Colophon:

इति श्रीविञ्जिमूरिकृष्णसूरिसूनोर्गौतमसगोत्रस्य रामकृष्णभक्तस्य सोमेश्वरस्य कृतौ राघवयादवीये श्रीपदलक्षणे वृत्तलक्षणसूचके श्लेषमहाकाव्ये प्रथमः सर्गः ॥

End:

तातं कामस्य कामं कृतललिततत श्रीचरं नम्रभक्तं
सद्यो भद्रासनं स्म क्रमयुतमतनुं शर्मकृच्चेतनं च ।
पूतं शुम्भत्पदं तं भजति कृतिजनः सन्मयं काकशत्रुं
लक्ष्यं तत्त्वेन शान्तं नरपरसाहितं मनस्विनीगीतम्(?) ॥

Colophon:

इति श्रीविञ्जिमूरिकृष्णसूरिसूनोर्गौतमसगोत्रस्य रामकृष्णभक्तस्य सोमेशस्य कृतौ राघवयादवीये श्रीपदलक्षणे वृत्तलक्षणसूचके श्लेषमहाकाव्ये पञ्चदशः सर्गः ॥

R. No. **1860.**

Palm-leaf. $16\frac{5}{8} \times 1\frac{1}{4}$ inches. Foll. 77. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915–16 by Daṇḍu Kṛṣṇamūrtigāru of Mandapeta, Rāmachandrapuram taluk.

Foll. 32*b* and 56*b* are left blank.

नित्यक्रियारत्नमाला.

NITYAKRIYĀRATNAMĀLĀ.

A treatise in Dharmaśāstra dealing with the duties and rituals to be observed every day; by Varadarājadēśika *alias* Kṛṣṇadāsa, son of Sōmana and Liṅgamāmbā and disciple of Pōdila Vēṅkaṭācārya. The author was a descendant of Mōpāṭi Kañcirāja and belonged to the Śrīvatsagōtra.

Contains the Paṭalas four to seven complete, but wants the beginning in the fourth Paṭala.

Beginning:

अथ तर्पणविधिरुच्यते ब्रह्माण्डपुराणे—

नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ।
तर्पणं तु भवेत्तस्य लिङ्गत्वेन तु कीर्तितम् ॥

वसिष्ठः—

नास्तिक्यभावाद्यः स्नातो न तर्पयति वै पितृन् ।
पिबन्ति देहनिस्रावं पितरोऽस्य जलार्थिनः ॥

* * * *

माध्याह्निकं च परिदानमथो जपः स्युः चत्वारि तर्पणविधिः पितृदेवतानाम् ।
प्रोक्तानि यत्र खलु यैर्द्विजपुङ्गवानां पापक्षयोऽप्युभयलोकसुखं च सिध्येत् ॥

Colophon:

इति श्रीमहाभागवतोत्तमपोदिलवेङ्कटाचार्यप्रियशिष्य(ष्येण)श्रीवत्सगोत्रतिलकेन श्रीमोपाटि कञ्चिराजान्वयदीपकेन श्रीसोमनलिङ्गमाम्बातनूजेन कञ्चिवरदराजाख्यदेशिकेन श्रीकृष्णदासापरनामधेयेन विरचितायां नित्यक्रियारत्नमालायां चतुर्थः पटलः ॥

* * * *

पूजा च षोडशमहापरिकर्मयुक्ता यत्रोदिता सकलकामदुघाघहारी ।
एका द्वयोर्नरकसंहरयोर्ययाति ? येनाप्नुवन्ति कृतिनोऽकृतविष्णुलोकम्* ॥

Colophon:

इति श्रीमहाभागवतोत्तमपोदिलवेङ्कटाचार्यप्रियशिष्य

* * * *

नित्यक्रियारत्नमालायां पञ्चमः पटलः ॥

* * * *

ब्रह्मादिपञ्चमखभोजनभोज्यवर्ज्यताम्बूलभागवतमुख्यपुराणगोष्ठ्याम् ।
एतानि यत्षडुदितानि समस्तपापं नाशं प्रयान्ति खलु यैः कृतिनां द्विजानाम् ॥

Colophon:

इति श्रीमहाभागवतोत्तमपोदिलवेङ्कटाचार्यप्रियशिष्य

* * * *

नित्यक्रियारत्नमालायां षष्ठः पटलः ॥

End:

बृहन्नारदीये—

यन्नामोच्चारणादेव महापातकनाशनम् ।
यं समभ्यर्च्य विप्रेन्द्रा परं मोक्षं लभेद्ध्रुवम् ॥

* रूपम् इति पाठान्तरम्.

अपां समीपे शयनासने गृहे दिवा च रात्रौ पथि चैव गच्छताम् ।
यद्यस्ति किञ्चित्सुकृतं कृतं मया जनार्दनस्तेन कृतेन तुष्यतु ॥

इति ज्ञानम् ।

कर्मानुवादोऽन्यफलार्पणं वा . . . . तानि ।
धिनोति चत्वारि च यत्र यैर्हरिस्तद्भक्तियुक्ताः खलु यान्ति तत्पदम् ॥

Colophon:

इति श्रीमहाभागवतोत्तमश्रीपोदिलश्रीवेङ्कटाचार्यप्रियशिष्येण श्रीवत्सगोत्रतिलकेन श्रीमोपाटिकश्चिराजान्वयदीपकेन श्रीसोमनलिङ्गमाम्बातनूजेन कश्चिवरदराजाख्यदेशिकेन श्रीकृष्णदासापरनामधेयेन विरचितायां नित्यक्रियारत्नमालायां सप्तमः पटलः ॥

नित्यक्रियारत्नमाला समाप्ता ॥

R. No. 1861.

Palm-leaf. 15⅜ × 1⅜ inches. Foll. 47. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Garuganṭa Doḍḍayyadīkṣitulugāru of Dalla, Rājahmundry taluk.

आपस्तम्बीयाध्वरतन्त्रव्याख्या—प्रयोगरत्नमाला.

ĀPASTAMBĪYĀDHVARATANTRAVYĀKHYĀ: PRAYŌGARATNAMĀLĀ.

By Cauṇḍapācārya. Same work as that described under R. No. 1530 *ante*.

Contains the sixth Praśna incomplete.

R. No. 1862.

Palm-leaf. 15¼ × 1⅜ inches. Foll. 62. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Garuganṭa Doḍḍayyadīkṣitulugāru of Dalla, Rājahmundry taluk.

अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Foll. 1*a*—55*a*.

Same work as that described under No. 1122 of the D.C.S. MSS., Vol. II.

Complete.

The MS. is said to have been copied by Brahmanna, the transcription having been completed on Wednesday, the 1st day of the dark fortnight of the Caitra month in the year Vibhava.

Fol. 55*b* contains some Kapardivacanas. Foll. 56*a*—58*a* contain Vaiśvadēvaprayōga. Fol. 58*b* contains some Gṛhyaprayōgakārikas. Foll. 59*a* to 62*a* contain Dattahōmavidhi and Vāstuhōmaviṣaya. Fol. 62*b* is left blank.

R. No. **1863.**

Palm-leaf. 17¼ × 1⅜ inches. Foll. 128. Lines, 7 in a page. Telugu. Fair,

Presented in 1915-16 by M.R.Ry. Varadapurti Sūraparājugāru of Tulayarāmēśvaram, Cocanada.

सिद्धान्तकौमुदीव्याख्या—बृहच्छब्देन्दुशेखरः.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ : BṚHACCHABDĒNDU-ŚĒKHARAḤ.

By Nāgēśabhaṭṭa. Same work as that described under No. 1411 of the D.C.S. MSS., Vol. III.

Begins in the Paribhāṣāprakaraṇa and breaks off in Ūdanta Puṁliṅga of the Śabdādhikāra.

R. No. **1864.**

Palm-leaf. 14⅜ × 1¼ inches. Foll. 82. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Varadapurti Sūraparājugāru of Tulayarāmēśvaram, Cocanada.

अध्यात्मरामायणव्याख्या.

ADHYĀTMARĀMĀYAṆAVYĀKHYĀ.

By Rāmavarman. Same work as that described under No. 2158 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Bālakāṇḍa and breaks off in the ninth Sarga of the Ayōdhyākāṇḍa.

R. No. **1865.**

Palm-leaf. 17 × 1¾ inches. Foll. 107. Lines, 8 in a page. Telugu. Much injured.

Presented in 1915-16 by M.R.Ry. D. V. Vīrabhadrasōmayājulu-gāru of Jagurpāḍu, Rājahmundry taluk

Fol. 98*b* is left blank.

ज्यौतिषरत्नमालाव्याख्या—श्रीधरीया.

JYAUTIṢARATNAMĀLĀVYĀKHYĀ : ŚRĪDHARĪYĀ.

A commentary on a work on natural astrology, the subjects treated of therein being given below. The author of the text is Śrīpati and the commentator is Śrīdhara. The text is said to have been composed after

consulting the works of Garga, Varāha, Lalla, etc., and to contain 473 stanzas. Five stanzas at the end give the subjects treated of in the 19 chapters of the work.

Complete.

१. प्रभवाद्यब्दसंज्ञाप्रकरणम्.
२. तिथिप्रकरणम्.
३. वारप्रकरणम्.
४. योगप्रकरणम्.
५. करणप्रकरणम्.
६. नक्षत्रप्रकणरम्.
७. मुहूर्तप्रकरणम्.
८. उपग्रहप्रकरणम्.
९. सङ्क्रमणप्रकरणम्.
१०. गोचारप्रकरणम्.
११. गोचारविशेषादिचन्द्रबलादि-प्रकरणम्.
१२. राशिकर्मादिप्रकरणम्.
१३. संस्कारप्रकरणम्.
१४. यात्राविधिप्रकरणम्.
१५. विवाहप्रकरणम्.
१६. वास्तुपूजाप्रकरणम्.
१७. गृहप्रवेशनप्रकरणम्.
१८. वस्त्रप्रकरणम्.
१९. सुरप्रतिष्ठाप्रकरणम्.

Beginning :

. . . . बोधकारिणी ।
व्याख्या विरच्यते रत्नमालायाः श्रीधराख्यया ॥

प्रथमप्रबन्धारम्भलक्षणं नमस्कारमाह—
प्रभवविरतिमध्यज्ञानवन्ध्या नितान्तं विदितपरमतत्त्वा यत्र ते योगिनोऽपि ।
तमहमिह निमित्तं विश्वजन्मात्ययानामनुमितमभिवन्दे भग्रहैः कालमीशम् ॥

अत्र पूर्वार्धेन . . . . हत्तां प्रतिपादयति—योगिनोऽपीति । सूक्ष्मविदः विदितपरमतत्त्वाः विदितपरमार्थज्ञानाः तेऽपि यत्र यस्मिन् काले विषये प्रभव-विरतिमध्यज्ञानवन्ध्या आद्यवसानमध्यज्ञानाशक्ताः

* * * *

विलोक्य गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च शास्त्रम् ।
दैवज्ञकण्ठाभरणार्थमेषा विरच्यते ज्यौतिषरत्नमाला ॥

गर्गादिमुनिभिरुक्तं वराहलल्लाचार्यकृतं शास्त्रं विलोक्येत्यनेन . . . . . शुद्धसम्प्रदायत्वमुच्यते । दैवज्ञकण्ठाभरणार्थमिति प्रयोजनमुच्यन्ते । ज्यौतिष-रत्नमालेति शास्त्रसंज्ञा कथ्यते ।

* * * *

Colophon :

इति श्रीधरीये ज्यौतिषरत्नमालाव्याख्याने तिथिप्रकरणं द्वितीयम् ॥

End:

शिवश्च(स्य) विष्णोश्च तथा परेषामेकारयन्त्यालयमादरेण ।
भुक्त्वा तु भोगान् दिवि तेऽमराणां ततः परं धाम समाश्रयन्ति ॥

Colophon:

(इति श्रीधरीये ज्यौतिषरत्नमालाव्याख्याने देवताप्रतिष्ठा)विधिरेकोनविंशति-प्रकरणं समाप्तम् ॥

आदितः श्लोकाः त्रिसप्तत्यधिकं चतुश्शतम् ।

अथ पञ्चभिः श्लोकैः प्रकरणानुक्रमण्योः

* * * *

एकोनविंशे देवप्रतिष्ठाप्रकरणे मासादिविधिरुक्तः ।

अथ शास्त्रावसानकालप्रबन्धनामनी आह—

इति ललितसुवृत्तां निर्मितां . . . . ।
. . . . चतुरगणककण्ठे राजिमु(मत्यु)ज्ज्वलन्ति ॥

R. No. **1866.**

Palm-leaf. 13⅜ × 1½ inches. Foll. 14. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Kanakadaṇḍi Nārāyaṇamūrti-gāru of Pamarru, Rāmachandrapuram taluk, Gōdāvari district.

ललितामाला.

LALITĀMĀLĀ.

On the details connected with the repetition of the Mantra addressed to Lalitā, a manifestation of Śakti. Slightly different from the work described under No. 6343 of the D.C.S. MSS., Vol. XIII.

Complete.

Beginning:

अस्य श्रीललितामालामहामन्त्रस्य उपस्थेन्द्रियाधिष्ठायिवरुणादित्य ऋषिः, गायत्री छन्दः, श्रीललिता परमेश्वरी देवता ।

End:

ओं ऐं ह्रीं श्रीं नमस्त्रिपुरसुन्दरि ओं ऐं ह्रीं श्रीं नमस्त्रिपुरसुन्दरि इत्यादि जपः कर्तव्यः ॥ इति निष्कृष्टार्थः ॥

R. No. **1867.**

Śrītāla. $9\frac{7}{8} \times 2\frac{3}{8}$ inches. Foll. 90. Lines, 16 in a page. Telugu. Slightly injured.

Presented in 1915–16 by Garimalla Sōmēśvara Rao Gāru of Kōṭipalli, Gōdāvri district.

(*a*) भुवनेश्वरीकल्पः.

BHUVANĒŚVARĪKALPAḤ.

Foll. 1*a*—8*a*. Fol. 8*b* is left blank.

Same work as that described under No. 7988 of the D.C.S. MSS., Vol. XV, wherein see for the beginning.

Contains the Paṭalas 1—11 complete.

End:

रक्तवस्त्रेण संवेष्ट्य धारयेद्वामके भुजे ।
यन्त्रराजमिदं प्रोक्तं हृल्लेखाया विनिर्गतम् ॥

Colophon:

इति श्रीभुवनाधि(नाथा)मन्त्रकल्पे यन्त्रसाधनविधिर्नाम एकादशः पटलः ॥

The MS. is said to have been transcribed by Kīkalenta Sūryanārāyaṇa for Nāgaliṅga Śāstri.

Fol. 9*a* is left blank. Fol. 9*b* contains an account of some transactions which took place in the house of Kambampāṭi Veṅkayyagāru.

(*b*) सूर्याष्टोत्तरशतनामावलिः.

SŪRYĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Fol. 10.

Similar to the work described under No. 9351 of the D.C.S. MSS., Vol. XVII.

Complete.

Beginning:

आदित्याय नमः, भानवे, खगाय, पूष्णे ।

End:

चक्राचलान्तर्वर्तिने, लोकधृते नमः, तिमिरापहाय ॥

Colophon:

इति श्रीसूर्याष्टोत्तरशतनामावलिः ॥

Fol. 11*a* contains a Pañcāśat of the second Praśna of the Taittirīyāraṇyaka and fol. 11*b* contains some accounts.

(c) महालक्ष्मीरत्नकोशः.

MAHĀLAKṢMĪRATNAKŌŚAḤ.

Foll. 12*a*—62*b*.

Same work as that described under No. 8019 of the D.C.S. MSS., Vol. XV.

Contains the Adhyāyas 52 to 77 which last is incomplete.

(d) सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Foll. 63*a*—68*b*.

By Śaṅkarācārya. Same work as that described under No. 48 of M. Seshagiri Sastri's Report on the Search for Sanskrit and Tamil MSS., No. 2. For extracts see page 255 *ibid.*

Contains stanzas 1 to 56.

Foll. 69*a*—90*b* contain some miscellaneous Mantras, Prayōgas and Rudranyāsas.

R. No. **1868.**

Palm-leaf. $17\frac{3}{8} \times 1\frac{3}{8}$ inches. Foll. 99. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915-16 by Vāraṇāsi Jōga Śāstrulugāru of Isakapalli, Pithāpuram, Gōdāvari district.

रामायणव्याख्या—सुबोधिनी.

RĀMĀYAṆAVYĀKHYĀ : SUBŌDHINĪ.

By Abhinava Rāmabhadrāśrama. Some work as that described under R. No. 1772 *ante*.

Contains the Sargas 1—113 only in the Ayōdhyākāṇḍa.

R. No. **1869.**

Palm-leaf. $17 \times 1\frac{1}{4}$ inches. Foll. 73. Lines, 6 in a page. Telugu. Fair.

Presented in 1915–16 by Vāraṇāsi Jōga Śāstrulugāru of Isakapalli, Pithāpuram.

रामायणव्याख्या—सुबोधिनी.

RĀMĀYAṆAVYĀKHYĀ : SUBŌDHINĪ.

Same work as that described under R. No. 1772 *ante*.

Contains the Sargas 1—119 only in the Ayōdhyākāṇḍa.

Fol. 30*b* is left blank.

R. No. 1870.

Palm-leaf. $17\frac{7}{8} \times 1\frac{1}{2}$ inches. Foll. 8. Lines, 6 in a page. Telugu. Good.

Presented in 1915-16 by Vāraṇāsi Jōga Śāstrulugāru of Isakapalli, Pithāpuram, Gōdāvari district.

सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

By Nārāyaṇamuni. Same work as that described under No. 2876 of the D.C.S. MSS., Vol. V, but the additional stanzas contained therein are not found here.

Complete.

The scribe gives the date of transcription and his name thus:

अक्षयाब्दे चैत्रशुक्ले सन्ध्याभाष्यमनन्यधीः ।
अलिखद्वारणाश्यन्वयोद्भवो वेङ्कयाह्वयः ॥

Colophon:

सन्ध्यावन्दनभाष्यं समाप्तम् ॥

R. No. 1871.

Palm-leaf. $18\frac{1}{4} \times 1\frac{1}{4}$ inches. Foll. 17. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915-16 by Mēdavarapu Jagannāthamgāru of Vēlampālem, Rāmachandrapuram taluk, Gōdāvari district.

(*a*) आश्वलायनगृह्यसूत्रम्.

ĀŚVALĀYANAGṚHYASŪTRAM.

Foll. 1*a*—15*a*. Fol. 15*b* is left blank.

Same work as that described under No. 1160 of the D.C.S. MSS., Vol. II.

Contains the Adhyāyas one and two only.

(*b*) अभिनवषडशीतिः.

ABHINAVAṢAḌAŚĪTIḤ.

Foll. 16*a*—17*b*.

Same work as that described under No. 3011 of the D.C.S. MSS., Vol. V, but without the commentary.

Incomplete.

R. No. 1872.

Palm-leaf. $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Foll. 60. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915-16 by Mēdavarapu Jagannāthamgāru of Vēlampālem, Rāmachandrapuram taluk.

शिववेदपादस्तवव्याख्यानम्—शिवतत्त्वदीपनम्.

ŚIVAVĒDAPĀDASTAVAVYĀKHYĀNAM : ŚIVATATTVA-DĪPANAM.

Same work as that described under No. 11208 of the D.C.S. MSS., Vol. XIX, but with the addition of the following preliminary stanzas. By Sūryanārāyaṇa, son and pupil of Pattaṅgi Tirumalabhaṭṭa, who was the son of Rāmabhaṭṭa of Mitrayavagōtra. The author was also the disciple of Bhāskaramūrti.

Almost complete.

Beginning:

श्रीमच्छ्रीगिरिशृङ्गहैमनमणिप्रासाददिव्यासने
ब्रह्मेन्द्रादिमुनीन्द्रवन्द्यचरणो निर्लिङ्गलिङ्गाकृतिः ।
कृष्णानद्यमृतावगाहनविपङ्कानेकसंसेवकैः
नानादेशसमागतैर्विजयते साम्बश्शिवः सेवितः ॥

श्रीमद्यतोऽष्टात्मन ईदृशं जगत् सत्यं चिदानन्दमयस्वरूपतः ।
तद्दक्षिणामूर्तिमृषीन्द्रसेवितं न्यग्रोधमूलाश्रितमाश्रये महः ॥
श्रीः श्रीस्वरूपा भजते यदाश्रिता क्षमा क्षमारूपधरा च पार्श्वयोः ।
वाणीपतेर्यश्चतुरा न वादिनो विद्यागुरुं तं हयशीर्षमाश्रये ॥

श्रीमन्मित्रय(वा)ख्यगोत्रविलस[च्छ्री]त्पत्तङ्गिकप्राह्वय-
श्रीमद्वंशसमुद्रचन्द्र उदभूद्विद्वज्जनाग्रेसरः ।
श्रीमत्तिर्म्मलभट्टनामकगुरुः श्रीरामभट्टाद्गुरोः
योऽध्यैष्ट श्रुतिमङ्गशास्त्रनिचयं श्रीमद्दयास्याश्रयात् ॥

तत्पुत्रस्तदधीतघृष्टनिगमः श्रीसूर्यनारायणः
श्रीमद्भास्करमूर्त्यनुग्रहवशात्संलब्धबुद्धिर्बुधः ।
तेनैवं क्रियते यथामति मता श्रीवेदपादस्तुतेः
व्याख्या श्रीशिवतत्त्वदीपनलसन्नाम्नी बुधप्रीतये ॥
श्रीमत्कृष्णोत्तरस्यां तटभुवि पुलिने मीलिताक्षं जपन्तं
श्रीशैलादागतो मां विदितशिवमहामन्त्रराजो महात्मा ।
दिव्यो वर्णी ललाटन्तपतपनमसूं वेदपादस्तवीयां
व्याख्यां कुर्वेककं(कः) श्रीगिरिनिलयशिवायार्पयेति न्ययुङ्क्त ॥

श्रुत्वा तस्य शिवं सत्यज्ञानानन्दमयं शिवम् ।
कुर्वे व्याख्यां तत्प्रसादाद् वेदपादस्तुतेः सुधीः ॥

R. No. **1873.**

Palm-leaf. 13½ × 1¼ inches. Foll. 5. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1915–16 by Mēdavarapu Jagannāthamgāru of Vēlampālem, Rāmachandrapuram taluk.

सौभाग्यकवचः.

SAUBHĀGYAKAVACAḤ.

Same work as that described under No. 7594 of the D.C.S. MSS., Vol. XIV.

Complete.

R. No. **1874.**

Palm-leaf. 17 × 1⅜ inches. Foll. 65. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1915–16 from Garimaḻḻa Sōmēśvara Rao Gāru of Kōṭipalli, Rāmachandrapuram taluk.

(*a*) **राघवयादवीयव्याख्यानम्.**

RĀGHAVAYĀDAVĪYAVYĀKHYĀNAM.

Foll. 1*a*—52*b*. Fol. 30*b* is left blank.

A commentary on the Rāghavayādavīya of Sōmēśvara which work is described under R. No. 1859 *ante*. The name of the commentator is not given.

Breaks off in the third Sarga.

Beginning:

नानालङ्कृतिपाकरीतिरसवृत्त्यत्युज्ज्वलं सद्गुणं
श्लाघ्याष्टादशवर्णनं सुमतिभिः श्राव्यं च भव्यप्रदम् ।
काव्यं राघवयादवीयमतुलं गम्भीरभावोदयं
व्याख्यातुं प्रयतामहे बुधजनानन्दं विधातुं वयम् ॥
सद्रीतिः सरसा लसन्मृदुपदा सद्वृत्तिरुच्चैर्गुणा
निर्दोषा सदलङ्कृतीर्गतवती शय्यां परामाश्रिता ।

सद्वर्णा तनुते मुदोऽञ्जनवती श्लिष्टोक्तिभिः संमता
श्रीसोमेश्वरपण्डितस्य कविता कान्तेव यूनः कवेः ॥

घनातिगूढसाराणां गवां सोमस्य निर्भरम् ।
कुर्यादशारदोल्लासः को वा विवरणं भुवि ॥

गम्भीरभावघनराघवयादवीयक्षीराम्बुधौ बुधजना निखिला यथेच्छम्
व्याख्यानमन्दरगिरीण्मथनेन योग्यं गृह्णन्तु निर्गतमनेकरसाधिजातम् ॥

इह खलु तत्र भवान् सोमेशनामा महाकविः राघवयादवीयनामककाव्यकरणनैपुणाविष्करणद्वारेण परमपुरुषार्थसाधनीभूतश्रीरामकृष्णकथामनुसन्दधानः प्रारिप्सितस्य काव्यस्य निरन्तरायपरिसमाप्तिं सम्प्रदायाविच्छेदं च कामयमानः

* * * *

स्वचिकीर्षितसफलीकरणसम्पादनारूपामिष्टदेवताप्रार्थनात्मिकामाशिषमाचरति —श्रीमानिति । आदितः श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धेरभ्युदयः ।

* * * *

अघानि व्यसनानि मृगयाद्यूतसुरास्त्रीसेवनवाक्पारुष्यदण्डपारुष्यार्थपारुष्यरूपाणि सप्त; तेषामन्तयति नाशयतीत्यघान्तः ; अति बन्धन इत्यस्माद्धातोः पचाद्यच् ।

* * * *

श्रीपदलक्षणे वृत्तलक्षणसूचके इति प्रतिज्ञाद्वयमिति ज्ञेयम् । श्लेषमहाकाव्य इति महच्छब्देन लक्षणसम्पत्तिः सूचिता । राघवयादवीय इति काव्यवर्ण्यकथनम् । प्रथमः सर्गः समाप्त इति शेषः ॥

End:

ततः प्रीतोऽभ्यनुज्ञातः परिक्रम्याभिनन्द्य च ।
सकलत्रसुहृत्पुत्रो द्वीपमब्धेर्जगाम ह ॥

इति भागवतोक्तेः ॥ मालिनी ॥

Colophon:

इति श्री.

श्रीरामकृष्णौ कृष्णाभौ सूरशूरकुलोद्भवौ ।
वन्दे वागर्थबोधार्थं जानकीरुक्मिणीपती ॥

सदिति । स्वदारैः स्वभार्यया कैकेय्या वा

* * * *

यतः यस्मात्कारणात् बालोऽसि; अस्तेर्लट्; इति जनकेन पित्रा दशरथेन उक्तोऽपि बली बलवान्.

(*b*) राघवयादवीयम्.

RĀGHAVAYĀDAVĪYAM.

Foll. 53*a*—65*b*.

By Sōmēśvara. Same work as that described under R. No. 1856 *ante*.

Contains the Sargas one to three only.

R. No. **1875.**

Palm-leaf. 16½ × 1⅜ inches. Foll. 23. Lines, 6 in a page. Telugu. Injured.

Purchased in 1915-16 from M.R.Ry. Garimaḻḻa Sōmēśvara Rao Gāru of Kōṭipalli, Rāmachandrapuram taluk.

वाञ्छानाथीयम्.

VĀÑCHĀNĀTHĪYAM.

A treatise in astrology dealing with divination and with certain matters relating to horoscopy. The author is perhaps Vāñchānātha.

Incomplete.

Beginning:

वाञ्छानाथेनारूढ . . . . ।

तावद्राशिभिरारूढः कथितः सर्वदा त्विति ॥

अस्यार्थः—लग्नादारभ्य लग्नस्वामिपर्यन्तं गणने कृते . . . . सङ्ख्याकराशिषु लग्नस्वामिनमारभ्य गणितेषु यो राशिः भवति स आरूढ-राशिः ।

End:

दशां नव[वि]धा विभज्य दशाधिपतिर्यत्र राशौ वर्तते तदधिपतिमारभ्य केन्द्रवशेन भुक्तिः । दशैकराशेरंशेषु क्रमादन्तर्दशेश्वरा इति भुक्तिः । ग्रह-भ्रमणमूलश्लोकः ।

R. No. **1876.**

Palm-leaf. 16⅞ and 13⅞ × 1½ inches. Foll. 39. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1915-16 from M.R.Ry. Garimaḻḻa Sōmēśvara Rao Gāru of Kōṭipalli, Rāmachandrapuram taluk.

Fol. 1*a* contains the name Śṛṅgāramañjarī. Foll. 1*b* and 2*a* are blank. Fol. 2*b* contains some stanzas relating to Bhagavadviṣaya.

(*a*) श्रृङ्गारमञ्जरीभाणः.

ŚṚṄGĀRAMAÑJARĪBHĀṆAḤ.

Foll. 3*a*—21*a*. Fol. 21*b* is left blank.

This is a drama of the Bhāṇa kind composed apparently by Viśvanātha(?), a poet in the court of Vēmayamantrin.

Complete.

Beginning:

स्मितललितवदनमव्यात्किञ्चित्कलमणितचलितगलमूलम् ।
उपरिविहरणं युवतेरुरसिजभरविनमदुन्नमन्मध्यम् ॥

अपिच—

कोशातकीफलमलं कुशलाय भूयात् आमूलचूडविपुलं मृदुलं सुदीर्घम् ।
आमृश्य वामचरणेन दुरक्षराणि वैधानि येन विधवाः सुखिताः क्रियन्ते ॥

नान्द्यन्ते सूत्रधारः—समन्तादवलोक्य सहर्षम्—

समयो मदयति हृदयं सुरभिस्सहकारसुरभिताशान्तः ।
माकन्दकुन्दकुड्मलपाटनपटुमृदुलपवनोऽयम् ॥

* * * *

अतस्तदभिनयामि किं नाम तादृशं रूपकम्? विमृश्य (स)स्मरणहर्षम् अस्ति खलु—

पूर्वं दाशरथे रथी समभवद्रामः पुराणः पुमान्
तस्यासीत्कवितास्वयंवृतग(गु)णो वल्मीकजन्मा कविः ।
सोऽयं वेमयमन्त्रिणस्समजनि श्रीरामचन्द्रात्मनः
राज्ञस्तत्र महाकविः परिणतः श्रीविश्वनाथोपमः(थाह्वयः) ॥

श्रृङ्गारमञ्जरी नाम रूपकं तेन निर्मितम् ।
अभिनेष्यामि सामाजिकाराधनचिकीर्षया ॥

तदानीन्तनकविकृतमिति न विचारणीयम् ।

शब्दास्त एव हि त एव हि सम्यगर्थाः
कां पुष्यति श्रियमियं कृतिरित्यवाच्यम् ।
चैत्रास्त एव दिवसास्तरवस्त एव
लोके तथापि किमपि प्रथते हि गन्धः ॥

End:

तथापीदमस्तु—

श्रृङ्गार एव रसग्रामपयातु यूनामाभोगवृत्तिरचितं स्थिरयौवनं वा ।
अस्मादृशेषु विदितेऽपि महापराधे कोपारुणाश्च न भवन्तु वधूकटाक्षाः ॥

Colophon:

इति श्रृङ्गारमञ्जरीना(म) भाणः समाप्तः ॥

विकारिवत्सरे चैत्रे मासे श्रृङ्गारमञ्जरी ।
दुर्वादिविश्वनाथेन लिखिता विदुषा मुदा ॥

(*b*) मदनविलासभाणः.

MADANAVILĀSABHĀṆAḤ.

Foll. 22*a*—23*b*.

This is also a drama similar to the last. Composed by Nāganātha, a disciple of Guru-Viśvēśvara.

Incomplete.

Beginning:

अव्यात्प्रकृतिमनोज्ञं नव्यं तारुण्यसौरभं शम्भोः ।
श्रृङ्गारजीवनौषधमङ्गं कारुण्यरङ्गभूर्युष्मान् ॥

अपिच—

लोलालकाञ्चितसमञ्चितफालभागं घर्माम्बुबिन्दुपरिमण्डितगण्डमूलम् ।
वल्गत्कुचं तनुरणत्कलकण्ठमूलं मोदं तनोतु सुरतं मदिरेक्षणायाः ॥

नान्द्यन्ते सूत्रधारः—समन्तादवलोक्य सहर्षम्— हन्त समन्ततो विलसति वसन्तमहिमा । यस्मिन्,

सालक्तदामचरणाहतिसत्क्रियाभिर्धन्या इव प्रविकसन्तितरामशोकाः ।
गण्डूषशीधुभिरमी कमलान(ना)नां सम्भावनेन वकुला मुकुलान् वहन्ति ॥

* * * *

श्रुतिमभिनीय,

नन्वमी निखिलकलाकलापवेदिनो रसिकशिखामणयः सामाजिका नाट्यविद्यासंदर्शनकुतूहलाः सबहुमानं मामित आगत्य निषीदेत्यादिशन्ति । किं नाम रूपकमभिनयामीति, स्मृतिमभिनीय, अस्ति खलु तस्य प्रशस्तिचन्द्रपूरितजलधिवेलावलयितवसुन्धरामण्डलस्य अखण्डितगुणगणश्रवणामोदितविशिष्टविद्वज्जन-

मान(स)स्य अनेकजन्मसञ्चितानन्यसुलभसुकृतोन्मेषफलितरससाहित्यविद्यासाम्राज्यसकलकलाकलापविज्ञानचतुर्मुखस्य भरद्वाजान्वयपारावारपूर्णरत्नाकरगुरुविश्वेश्वरकविचन्द्रस्य प्रियशिष्यो नागनाथकविः । तेन विरचितं मदनविलासं नाम भाणमभिनीय सामाजिकानां चित्तमाराधयामि ।

End:

प्राचीमवलोक्य, अयं खलु

पादपतनेन भगवान् प्रसादमुपनयति पद्मिनीं [तां] भास्वान् ।
प्रालेयबाष्पकणिकापरिवाहमुखाम्बुजं दधति(तीम्) ॥

साञ्जलिबन्धम्.

Fol. 24*a* is left blank. Foll. 24*b* and 25*a* contain a few stanzas of Bhōjacaritra. Foll. 25*b* and 26*a* contain Tripurasundarīmantrapūjā. Foll. 26*b*—30*a* contain a portion of Kāminīkāmukōllāsabhāṇa. Fol. 30*b* is left blank.

(*c*) कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ: SAÑJĪVINĪ.

Foll. 31*a*—39*b*.

By Mallinātha. Same work as that described under R. No. 375 *ante*. Contains the fourth Sarga only.

This MS. is said to have been copied by Carukapalli Sāmbaśivan from the MS. of Viñjimūri Sōmappagāru, the transcription having been completed on Wednesday, the first day of the dark fortnight of the Phālguna month in the year Śubhakṛt.

R. No. 1877.

Palm-leaf. 16¾ × 1½ inches. Foll. 95. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Garimaḻḻa Sōmēśvara Rao Gāru of Kōṭipalli, Rāmachandrapuram taluk.

बोप्पनभट्टीयव्याख्या.

BOPPANABHAṬṬĪYAVYĀKHYĀ.

This is a commentary on the Sūtras of Boppanabhaṭṭa which are based upon the Āpastamba Gṛhyasūtras. By Mādhavamanīṣin, son of Mācanasūri, a resident of Munikūṭālaya. The commentary gives also the ritualistic procedure connected with the Sūtras.

Contains the first 26 Khaṇḍas in which the subject last treated of is Caula.

This MS. is said to have been copied by Kambambāḍi Sarvaēśvarācārlu, the transcription having been completed on Saturday, the 5th day of the bright fortnight of the Bhādrapada month in the year Yuva.

Beginning:

अथ गार्ह्याणि कर्माणि । अथशब्दो बह्वर्थवाची—"मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ"इति । अत्राथशब्दो मङ्गलार्थतया ग्रन्थादौ प्रयुक्तः । शास्त्रादौ मङ्गलार्थस्य प्रयोगः सर्वथा कर्तव्यः । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवन्तीति ।

* * * *

गार्ह्याणि आपस्तम्बीयकल्पसूत्रे आचारलक्षणः कर्मविषयः कश्चित् प्रश्नो गृह्यम् । तत्सम्बन्धीनि गार्ह्याणि, तत्रोक्तानीति । क्रियन्त इति कर्माणि, विवाहादीनि वक्ष्यामीति वाक्यशेषः । कस्मिन् काले तानि कर्तव्यानीत्याह, उदगयनपूर्वपक्षाहःपुण्याहेषु कार्याणीति । उदगयनं च पूर्वपक्षश्च अहश्च पुण्याहानि चेति द्वन्द्वः ।

* * * *

Colophon:

इति मुनिकूटालयनिजनिवासमाचनसूरिसूनुमाधवमनीषिविरचिते बोप्पनभट्टीयव्याख्याने प्रथमः खण्डः ॥

End:

यथा चौलं तथास्य गोदानाख्यमपि कर्तव्यमित्यर्थः । अतिदेशप्राप्तपुनर्वसूनक्षत्रस्यापवादः । अन्यस्मिन्नपि नक्षत्र इत्यतिदेशप्राप्ततृतीयवर्षस्यापवादः । षोडशे वर्ष इति समानमन्यत् । किमविशेषेणेत्याह । ग्लप्सपुञ्जीलशललीशिखानिधानवर्जं कुर्यात् । समाप्तं गोदानव्रतम् ॥

Colophon:

इति मुनिकूटालयनिजनिवासमाचनसूरिसूनुमाधवमनीषिविरचिते बोप्पनभट्टीयव्याख्याने चौलप्रयोगो नाम षड्विंशतिः । स्मार्तभाष्यं समाप्तम् ॥

R. No. 1878.

Palm-leaf. 16 × 1½ inches. Foll. 24. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1915-16 from M.R.Ry. Garimaḻḻa Sōmēśvara Rao Gâru of Kōṭipalli, Rāmachandrapuram taluk.

चोरपञ्चाशिका—सव्याख्या.

CŌRAPAÑCĀŚIKĀ WITH COMMENTARY.

Foll. 1*a*—24*a*. Fol. 24*b* is left blank.

This MS. contains the Uttarapañcāśikā or the second set of 50 stanzas of Cōrakavi's Bilhaṇacaritra, which is a love poem in two Pañcāśikas describing the amours between Bilhaṇa and his royal bride, as also the commentary thereon by Basavēśvarayajvan, son of Timmābhaṭṭa and Accanna.

Contains the Uttarapañcāśikā complete.

The MS. is said to have been copied by Dūrvāsula Sōmayājulu, the transcription having been completed on Thursday, the 13th day of the dark fortnight of the Puṣya month in the year Vyaya.

Beginning:

विश्वेशं शिवमव्ययं हरिमथो वाणीं गणेशं गुरून्
वाल्मीकिप्रमुखान् पुरातनकवीन् नत्वोत्तमाङ्गेन तान् ।
श्रीमच्चोरकवीश्वरेण रचिता पञ्चाशदार्यस्तुता
विद्वत्सङ्घमुदे विचार्य बहुधा व्याख्यायते शब्दतः ॥

नितान्तवैयाकरणाश्च हैतुका वसन्त्यलङ्कारविदश्च तत्कृते ।
पञ्चाशतश्चोरकवेर्विरचि(च्य)ते टीका वितदौ विजिगीषहेतुः(?) ॥

पितरौ तावच्चतिम्माभट्टौ नत्वा यथाविधि ।
चोरपञ्चाशतष्टीकां बसवेशश्चिकीर्षति ॥

कविरिदानीं स्वकृतप्रबन्धादावाशीर्नमस्क्रिया वस्तुनिर्देशो वेत्याद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात् परिसमाप्तिकामो मङ्गलमाचरेदित्याद्यनुमितश्रुत्या च मङ्गलस्यावश्यकरणीयत्वात् प्रथमश्लोके विद्यां प्रमादगलितामिव चिन्तयामीत्यत्र प्रमा ज्ञानं तत् ददातीति प्रमादः परमात्मा आत्ममनस्संयोगाभावे ज्ञानस्यानुत्पत्तेरात्मनः प्रमादत्वम् । तेन गलितां त्यक्तामजामेकामित्युपक्रम्य जहात्येनां भुक्तभोगामजोऽन्य इति श्रुतेः ।

End:

न च पूर्वोत्तरार्धयोर्विरोध इति वाच्यम् । विरहातुरत्वात् देशान्तरस्थत्वाच्च तदीयवाटीमुकुरादिकं कदा द्रक्ष्यामीत्यर्थः । आशीरलङ्कारो व्यज्यते । आशीर्नामाभिलषितवस्तुन्याशंसनं तथेति लक्षणम् । शार्दूलविक्रीडितमेतत् ।

"सूर्याश्वैर्मसजास्ततस्सगुरवश्शार्दूलविक्रीडितम्" इति लक्षणात् । अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः । पत्युर्नो यज्ञसंयोग इति वैयाकरणसूत्रेण विरोध(स)त्त्वेऽपि जायाप्रतिग्राहितगन्धमाल्यामित्यत्र अपुत्राया अपि सुदक्षिणाया जायाशब्दः प्रयुक्तः, सा भाविपुत्रवतीति चेत् अयज्ञसंयोगेऽपि पत्नीति प्रयोगाद्वा इयं श्रुतिर्विलिख्य(खि)तेति न विरोधः ॥

Colophon:

इति श्रीमदष्टभाषाकवित्वरचनाधुरीणा[व]ग्निहोत्रबसवेश्वरयज्वना विरचिता चोरपञ्चाशतष्टीका समाप्ता ॥

R. No. 1879.

Palm-leaf. 17 × 1¼ inches. Foll. 86. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1915-16 from Garimalla Sōmēśvara Rao Gāru of Kōṭipalli, Rāmachandrapuram taluk.

Foll. 1*a*—3*a* contain Dakṣiṇāmūrtyaṣṭōttaraśatanāmastōtra, 3*b*—6*b* Dakṣināmūrtikavaca and fol. 7 contains Mēdhādakṣiṇāmurtimantra

शिवगीताटीका.

ŚIVAGĪTĀṬĪKĀ.

Foll. 9*a*—77*b*. Fol. 12*b* is left blank.

By Kēḷaḍi Vēṅkaṭādri. Similar to the commentary on the Śivagītā, which has been described under No. 2551 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

This MS. is said have been copied by Amarāvati Paṭṭābhirāmuḍu Anantarāmuḍu for Lakṣmīnarasu at Benares, the transcription having been completed on the 10th day of the bright fortnight of the Kārttika month in the year Vyaya.

Beginning:

शुद्धाद्वैतसमर्थने पटि(टु)मतेर्यस्य चे(प्र)तापं सकृ-
च्छ्रुत्वाप्येकरुचिं दधाति दधते त्यक्तेषणाजीवभेदेन(?) ।
यद् द्रव्येषु गुणेषु कर्मसु तथा जातौ विशेषेषु च
प्रौढाहङ्कृतयो धृतैः सह निजं सम्बन्धमुद्वास्यते ॥
यल्लीलां श्रवणातिथिं कृतवतः कल्पद्रुमस्याभवत
कम्पस्तम्भभरस्तथा समभवच्छेषस्य गां बिभ्रतः ।

च(श)कस्याक्षमिषात्समस्तदिविषत्सौभाग्यलोपावहो
व्यक्त शिछद्रभरं परस्य विभदोदादानका मानसी(?) ॥
यत्कीर्तिं कलहंसकुन्दधवलां कृत्वा महेन्द्रादयोऽ-
वज्ञामात्मनि सन्ततं विदधते लज्जाभयैर्मन्थराः ।
श्रुत्वा देवगुरुर्मलीमसमना यद्वैखरीं जायते
सोऽयं श्रीकेलडीशवेङ्कटविभुर्वर्वर्ति सर्वोपरि ॥
योऽयं पद्मपुराणस्थषोडशाध्यायनिर्मिताम् ।
शिवगीतां शिवप्रीत्यै विवेचयति सादरम् ॥

सूत उवाचेति। ऋषीन् प्रति निर्देशः। अथेति। अथ ऋषयः उत्तमाधिकारिणो बुभुत्सवोऽपृच्छन्निति निर्णयानन्तरम्। अतः तेषामनपेक्षणीयत्वात् भवदुःखस्य संसारदुःखस्य भेषजं निवृत्त्युपायम्। महेशस्यानुग्रहात् वक्तरि श्रोतृषु कृपाबलात्संवक्ष्यामि।

* * * *

Colophon:

इति श्रीमदद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धरश्रीकेलडिवेङ्कटाद्रिणा विरचितायां शिवगीताव्याख्यायां प्रथमाध्यायः ॥

End:

शातातपोऽपि—

अनृतं मद्यगन्धं च पुनाति वृषलस्यान्नं बहिः सन्ध्याबु(मु)पासितेति।

यत्त्वत्री(त्रि)वचनम्—

सन्ध्यात्रयन्तु कर्तव्यं द्विजेनात्मविदा सदा।
उभे सन्ध्ये तु कर्तव्यं ब्राह्मणैः स्वगृहे(भवे)दिति ॥

अस्यायमाशयः, यद्यपि बहिरेव सन्ध्यात्रयं प्रशस्तम्। यदा विहरणाद्यङ्गलोपप्रसक्तिः तदा श्रौतस्य विहरणस्य प्राबल्यात्तदनुरोधेन द्वे सन्ध्ये गृहेऽप्यनुष्ठेये इति। स्फुटश्चैतन्माधवादिग्रन्थेष्विति दिक् ॥

Colophon:

इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धरश्रीकेलडिवेङ्कटाद्रिनायकविरचितायां शिवगीताटीकायां षोडशोऽध्यायः ॥

R. No. 1880.

Paper. 8¾ × 3¼ inches. Foll. 41. Lines, 10 in a page. Telugu. Good.

Purchased in 1915-16 from Garimella Sōmēśvara Rao Gāru of Kōtipalli, Rāmachandrapuram taluk.

सप्तशतीव्याख्या.

SAPTAŚATĪVYĀKHYĀ: GUPTAVATĪ.

Foll. 1*b*—40*a*. Foll. 1*a*, 4*b* and 41 are left blank.

A commentary on the work described under No. 2444 of the D.C.S. MSS., Vol. IV, Part II. It is called Guptavatī, and is intended to explain the hidden meanings of the text. By Bhāskararāyadīkṣita, son of Gambhīrarāyabhāratīdīkṣita.

Contains the commentaries on Upōdghāta, Argala, Kavaca and Kīlaka, and breaks off in those on the Saptaśatīmantra.

Beginning:

श्रीरामं प्रति पुष्कराभिधमहायक्षेण वेदत्रय-
व्याख्यानावसरे विशिष्य कथितं श्रीविष्णुधर्मोत्तरे ।
एतां धेनुमुपह्वये(च) सुदुघामित्यर्ग(त्युद्ग)तं शङ्करा-
चार्यं शिष्यचतुष्टयेन सहितं वन्दे गुरूणां गुरुम् ॥
विधिविष्णुमुखामरोदयस्थितिनाशेषु शिवोऽप्यनीश्वरः ।
जगदम्ब तव त्वयं क्रमः क्षणमुद्दालिकपुष्पभञ्जिका ॥
कवचार्गले च कीलकमादौ मध्ये त्रयोदशाध्यायी ।
अन्ते प्राधानिकवैकृतिके मूर्तित्रयीरहस्यानाम् ॥
इति मार्कण्डेयपुराणाध्यायैकोनविंशतौ गुप्तान् ।
अर्थान् प्रकटीकुरुते भास्कररायोऽग्निचित्कतिचित् ॥
सप्तशती लुप्तसतीराप्तवती सत्कृतीव तप्तवती ।
मम तु मती रचितवती गुप्तवतीं नाम बिभ्रतीं विवृतिम् ॥
काव्यव्याकृतितार्किकौपनिषदेऽप्येकैकविद्भिः कृताः
टीकाः सन्ति चतुर्विधा अपि चमत्कारावहास्तद्विदाम् ।
ताश्चण्डीजपहोमतर्पणमुखानुष्ठानमन्त्रोपयो-
ग्यर्थज्ञानमभीप्सतां न विदुषां चित्ते चमत्कुर्वते ॥
एतद्ग्रन्थरसास्वादसामर्थ्यं विदुषां यदि ।
किमिति प्रार्थनीयास्ते न चेत्प्रार्थनयापि किम् ॥

कैः पुष्पैरक्षतान् दत्वा भृङ्गा भुवि निमन्त्रिताः ।
केन वा चम्पकेनार्धचन्द्रं दत्वा निराकृताः ॥
यत्सप्तशत्यायुषि गुप्तवत्यामवेक्षणीयं तदवेक्षणीयम् ।
चण्डीसपर्याक्रमकल्पवल्ल्यां यत्तत्र गुप्तं तदिहास्ति गुप्तम् ॥

तत्रादौ वक्ष्यमाणानुक्रमणिकश्लोकाश्चतुर्दश लिख्यन्ते—

मङ्गलाचरणं ग्रन्थप्रतिपाद्यार्थसङ्ग्रहः ।
ततश्चण्डीति शब्दस्य तदर्थस्य च निर्णयः ॥

* * * *

प्राधानिकरहस्यस्य व्याख्या वैकृतिकस्य च ।
ततो मूर्तिरहस्यस्मृत्यनुक्रमणिका मता ॥

* * * *

Colophon:

इति श्रीमद्भारत्युपाह्वयगम्भीरराजदीक्षितसूरिसूनुना भास्कररायदीक्षितमहाग्निचिता विरचितायां सप्तशतीव्याख्यायां गुप्तवतीसमाख्यायामुपोद्घातप्रकरणम् ॥

End:

मृकण्डुपुत्रभगवद्वैश्यब्रह्मनृपार्षिभिः ।
चतुर्दश स्युः श्लोकार्थाश्चतुर्विंशतिरीरिताः ॥
अवशिष्टास्तु षट्षष्टिः श्लोकमन्त्रा इति स्थितिः ।

अथ मन्त्राणां तत्र तत्रापेक्षितांशमात्रव्याख्या । सापि कात्यायनीतन्त्रसंमतानामेव श्लोकानां प्रदर्श्यते । ये तु तत्र तत्राधिकश्लोकाः क्वचित्क्वचिदुपलब्धा इहास्माभिः कतिपये प्रदर्शयिष्यन्ते ते प्रकृततन्त्रानुसारिभिर्नोपादेयाः ॥

R. No. **1881.**

Paper. $6\frac{5}{8} \times 2\frac{3}{4}$ inches. Foll. 74. Lines, 9 in a page. Telugu. Good.

Purchased in 1915–16 from M.R.Ry. Garimaḻḻa Sōmēśvara Rao Gāru of Kōṭipalli, Rāmachandrapuram taluk.

बगलाकल्पः.

BAGALĀKALPAḤ.

This is also called Ṣaḍvidyāgama or Sāṅkhyāyanatantra.

Similar to the work described under No. 7949 of the D.C.S. MSS., Vol. XV, but wants the introductory stanzas in the beginning.

Complete in 34 Paṭalas which treat of the undermentioned subjects:—

१. उपोद्घातः.
२. गुरुशिष्यलक्षणम्.
३. अभिषेकविधिः.
४. सन्ध्याविधिः.
५. एकाक्षरमन्त्रकथनम्.
६. एकाक्षरीप्रयोगकथनम्.
७. मन्त्रराजकथनम्.
८. मन्त्रराजप्रयोगः.
९. पूजाप्रयोगकथनम्.
१०. यन्त्रलेखनक्रमः.
११. तर्पणप्रयोगः.
१२. बगलागायत्री.
१३. पूजाविधिः.
१४. अर्चनविधिः.
१५. अस्त्रप्रयोगः.
१६. पञ्चास्त्रकथनम्.
१७. शताक्षरीप्रयोगः.
१८ शताक्षरीप्रयोगः.
१९. Do.
२०. परविद्यास्त्रप्रयोगः.
२१. परविद्याकर्षणप्रयोगः.
२२. Do.
२३. Do.
२४. चतुरक्षरीपूजाप्रयोगः.
२५. Do.
२६. चतुरक्षरीतर्पणप्रयोगः.
२७. चतुरक्षरीहोमप्रकरणम्.
२८. हृदयप्रयोगः.
२९. बगलायन्त्रप्रकाशनम्.
३०. बगलाष्टाक्षरीप्रयोगः.
३१. Do.
३२. प्रयोगोपसंहारः.
३३. Do.
३४. जपहोमादिः, बलिप्रकारः, षट्-प्रयोगविधानम्.

R. No. **1882.**

Paper. $10\frac{1}{2} \times 4\frac{5}{8}$ inches. Foll. 50. Lines, 19 in a page. Telugu. Good.

Purchased in 1915–16 from Garimaḻḻa Sōmēśvara Rao Gāru of Kōṭipalli, Rāmachandrapuram taluk.

(*a*) काकतालीयवादः.

KĀKATĀLĪYAVĀDAḤ.

Foll. 1*a*—5*a*. Fol. 5*b* is left blank.

By Śambhudāsa. Same work as that described under R. No. 675 *ante*, wherein see for the beginning.

End:

स्वशब्देनानुपादानकृतः सर्वोऽव्ययं(इवेत्यव्यय)लोपः समासाच्चेति छप्रत्यय-विधानकृतः इति द्रष्टव्यमित्यलं विस्तरेण ॥

शम्भुदासकृतौ काकतालीयार्थोपवर्णना ।
पितरं बालभाषेव प्रीणात्येव सुधीजनम् ॥

(*b*) शब्दखण्डसारमञ्जरी.
ŚABDAKHAṆḌASĀRAMAÑJARĪ.

Foll. 6*a*—20*a*. Fol. 20*b* is left blank.

By Bhavānandavāgīśa. Same work as that described under No 4309 of the D.C.S. MSS., Vol. VIII.

Contains the Kārakavivēcana only complete.

The MS. is said to have been copied by Durgā Veṅkaṭācalam, the copying having been completed on Friday, the 12th day of the bright fortnight of the month of Caitra in the year Saumya.

(*c*) णत्वसमर्थनम्.
ṆATVASAMARTHANAM.

Foll. 21*a*—26*b*.

A treatise maintaining that the word Nārāyaṇa can be interpreted to denote God Śiva without any difficulty in explaining grammatically the letter ण in it.

Complete.

Beginning:

नारायणपदे णत्वं न सिध्यति शिवे त्विति ।
इह केचिद्दाक्षिणात्या रुवन्त्यज्ञानमोहिताः ॥
तेषामज्ञाननाशाय सदाशिवकृपाबलात् ।
विवृण्महे शिवे णत्वसिद्धिं नारायणे पदे ॥

रषाभ्यां नो णः समानपदे इत्यत्र समानपद इत्यस्य एकपद इत्यर्थे संति रामनामगन्धर्वगानमित्यादिसमासरूपैकपदस्थनकारस्य णत्वं प्राप्नोतीत्यतिव्याप्तिः।

End:

कश्चित्प्रकारं परिकल्प्य नारायणशब्दे णत्ववारणप्रकारः सर्वोऽपि निरसनीयः । इत्थं च नारायणशब्दे नारमयनं यस्येति निरुक्तहेतोः सत्त्वाच्छिवपरत्वं सिध्यत्येवेति राद्धान्तं चक्रे ॥

Colophon:

इति नारायणशब्दे णत्वसमर्थनं समाप्तम् ॥

Fol. 27 contains Parabrahmastuti in the Telugu language.

(*d*) कारकदीपिका.
KĀRAKADĪPIKĀ.

Foll. 28*b*—50*b*.

Fol. 28*a* states that the work Kārakadīpikā is being commenced.

A treatise explaining the government of words in Sanskrit syntax. The author's name is not given.

Beginning :

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । प्रातिपदिकस्यार्थः प्रातिपदिकार्थः । अत्रार्थशब्दो नियतोपस्थितिवाचकः । जन्यत्वं षष्ठ्यर्थः । प्रातिपदिकपदेन लिङ्गविशिष्टपरिभाषया प्रातिपादिकप्रकृतिकलिङ्गबोधकप्रत्ययविशिष्टस्यापि ग्रहणम् ।

End :

अक्षशब्दोत्तरं परत्वात्तृतीयैव । कर्मत्वप्रयुक्ताद्वितीया तु नैव जायते, विप्रतिषेधशास्त्रबलात् । तृतीयैव शक्तिद्वयबोधिका । अक्षान् दीव्यतीति प्रयोगस्तु लक्षणया देवनजयप्रयुक्तधनपरत्वे बोध्यः ॥

R. No. **1883.**

Paper. 13¾ × 4¼ inches. Foll. 16. Lines, 12 in a page. Telugu. Good.

Purchased in 1915–16 from Garimaḻḻa Sōmēśvara Rao Gāru of Kōṭipalli, Rāmachandrapuram taluk.

लघुशब्देन्दुशेखरटीका.

LAGHUŚABDĒNDUŚĒKHARAṬĪKĀ.

Foll. 1*b*—16*a*. Foll. 1*a* and 16*b* are left blank.

A commentary on the Laghuśabdēnduśēkhara of Nāgēśabhaṭṭa : by Śrīdhara. The work has been partly printed.

Breaks off in the Acsandhiprakaraṇa.

The copyist adds a stanza in the beginning in which he mentions his name.

Beginning :

चिन्तामणिं नमस्कृत्य महाविघ्नप्रणाशनम् ।
नागेश्वराधिपं वेङ्कट्रामो लिखति श्रीधरी(म्) ॥
रक्ष(दक्षि)णे लक्ष्मणो यस्य वामे तु जनकात्मजा ।
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् ॥

पातञ्जल इति पतञ्जलिना निर्वृत्ते योगशास्त्रे इत्यर्थः । महाभाष्य इति । महाभाष्ये चेत्यर्थः । समुचितऋषित्रयेति । व्याकरणे सम्यगुचितपाणिनिकात्यायनपतञ्जलिरूपऋषित्रय इत्यर्थः ।

End:

एवं चोपसर्गाः क्रियेत्येव सिद्धे योगग्रहणसामर्थ्यात् सिद्धम् । नन्वेवमपि प्रगत ऋच्छः प्रर्च्छ इत्यत्र वृद्धिः दुर्वारैवेत्यत आह--प्रकृते चेति । ननु सुबन्ते धाताविन्येवार्थः कुतो नेत्यत आह—तुल्यास्येति ।

R. No. **1884.**

Paper. 15⅓ × 6¾ inches. Foll. 217. Lines, 14 in a page. Dēvanāgarī. Good.

Presented in 1915–16 by M.R.Ry. V. Prabhākara Śāstri of Pedakal̤l̤epalli in the Kistna district.

भगवद्गीताव्याख्या—गूढार्थदीपिका.

BHAGAVADGĪTĀVYĀKHYĀ: GŪḌHĀRTHADĪPIKĀ.

Fol. 39*b* is left blank.

By Madhusūdanasarasvatī. Same work as that described under No. 2071 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

R. No. **1885.**

Paper. 12 × 6⅛ inches. Foll. 52. Lines, 14 in a page. Dēvanāgarī. Good.

Presented in 1915–16 by M.R.Ry. V. Prabhākara Śāstri of Pedakal̤l̤epalli.

सिद्धान्तलेशसङ्ग्रहः.

SIDDHĀNTALĒŚASAṄGRAHAḤ.

By Appayadīkṣita. Same work as that described under No. 4764 of the D.C.S. MSS., Vol. IX.

Complete.

R. No. **1886.**

Paper. 12 × 5½ inches. Foll. 5. Lines, 16 in a page. Dēvanāgarī. Slightly injured.

Presented in 1915–16 by M.R.Ry. V. Prabhākara Śāstri of Pedakal̤l̤epalli.

तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

By Annambhaṭṭa. Same work as that described under No. 4143 of the D.C.S. MSS., Vol. VIII.

Complete.

R. No. 1887.

Paper. 10½ × 7 inches. Foll. 21. Lines, 14 in a page. Dēvanāgarī. Good.

Presented in 1915-16 by M.R.Ry. V. Prabhākara Śāstri of Pedakaḻḻepalli.

दशश्लोकी, सिद्धान्तबिन्दुव्याख्यासहिता.

DAŚAŚLŌKĪ WITH SIDDHĀNTABINDUVYĀKHYĀ.

The text is by Śaṅkarācārya and the commentary is by Madhusūdanasarasvatī. Same work as that described under No. 4599 of the D.C.S. MSS., Vol. IX.

Complete.

R. No. 1888.

Paper. 12¾ × 6⅛ inches. Foll. 20. Lines, 23 in a page. Dēvanāgarī. Good.

Presented in 1915-16 by M.R.Ry. V. Prabhākara Śāstri of Pedakaḻḻepalli.

सनत्सुजातीयविवरणम्.

SANATSUJĀTĪYAVIVARAṆAM.

Fol. 20*b* is left blank.

By Śaṅkarācārya. Same work as that described under No. 2093 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

The MS. is said to have been copied by Vāmanamauni.

R. No. 1889.

Paper. 12 × 6⅛ inches. Foll. 29. Lines, 11 in a page. Dēvanagarī. Good.

Presented in 1915-16 by M.R.Ry. V. Prabhākara Śāstri of Pedakaḻḻepalli.

विवेकचूडामणिः.

VIVĒKACŪḌĀMAṆIḤ.

Fol. 29*b* is left blank.

By Śaṅkarācārya. Same work as that described under No. 4723 of the D.C.S. MSS., Vol. IX.

Complete.

R. No. 1890.

Paper. 10½ × 4¾ inches. Foll. 15. Lines, 9 in a page. Dēvanāgarī. Good.

Presented in 1915-16 by M.R.Ry. V. Prabhākara Śāstri of Pedakaḻḻepalli.

नृसिंहसहस्रनामस्तोत्रम्.

NṚSIMHASAHASRANĀMASTŌTRAM.

Same work as that described under No. 8938 of the D.C.S. MSS., Vol. XVII.

Complete.

R. No. **1891.**

Paper. 11 × 4 inches. Foll. 296. Lines, 8 in a page. Dēvanāgarī. Slightly injured.

Presented in 1915–16 by M.R.Ry. V. Prabhākara Śāstri of Pedakallepalli.

ज्ञानवासिष्ठम्.

JÑĀNAVĀSIṢṬHAM.

Same work as that described under No. 1982 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

R. No. **1892.**

Paper. 10 × 5¼ inches. Foll. 37. Lines, 15 in a page. Dēvanāgarī. Good.

Presented in 1915–16 by M.R.Ry. V. Prabhākara Śāstri of Pedakallepalli.

तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

By Śaṅkarācārya. Same work as that described under No. 505 of the D.C.S. MSS., Vol. I, Part III.

Complete.

R. No. **1893.**

Paper. 12⅞ × 7 inches. Foll. 58. Lines, 17 in a page. Dēvanāgarī. Good.

Presented in 1915–16 by M.R.Ry. V. Prabhākara Śāstri of Pedakallepalli.

छान्दोग्योपनिषद्भाष्यम्.

CHĀNDŌGYŌPANIṢADBHĀṢYAM.

By Śaṅkarācārya. Same work as that described under No. 464 of the D.C.S. MSS., Vol. I, Part III.

Breaks off in the eighth Praśna.

R. No. 1894.

Paper. 12½ × 4½ inches. Foll. 46. Lines, 9 in a page. Dēvanāgarī. Good.

Presented in 1915–16 by M.R.Ry. V. Prabhākara Sāstri of Pedakallepalli.

Fol. 1*a*. Fol. 46*b* is left blank.

छान्दोग्योपनिषत्.
CHĀNDŌGYŌPANIṢAD.

Same work as that described under No. 451 of the D.C.S. MSS., Vol. I, Part III.

Complete.

R. No. 1895.

Paper. 13¼ × 6 inches. Foll. 15. Lines, 12 in a page. Dēvanāgarī. Good.

Presented in 1915–16 by M.R.Ry. V. Prabhākara Śāstri of Pedakallepalli.

(*a*) कठवल्ल्युपनिषत्.
KAṬHAVALLYUPANIṢAD.

Foll. 1*a*—5*a*.

Same work as that described under No. 334 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*b*) प्रश्नोपनिषत्.
PRAŚNŌPANIṢAD.

Foll. 5*a*—8*a*.

Same work as that described under No. 610 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*c*) मुण्डकोपनिषत्.
MUṆḌAKŌPANIṢAD.

Foll. 8*b*—11*a*.

Same work as that described under No. 713 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*d*) माण्डूक्योपनिषत्.
MĀṆḌŪKYŌPANIṢAD.

Foll. 11*a*—12*b*.

Same work as that described under No. 694 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(e) तैत्तिरीयोपनिषत्.

TAITTIRĪYŌPANIṢAD.

Foll. 12*b*—13*b*.

Same work as that described under No. 486 of the D.C.S. MSS., Vol. I, Part III.

Contains the second Praśna incomplete.

(f) ईशावास्योपनिषत्.

ĪŚĀVĀSYŌPANIṢAD.

Fol. 14.

Same work as that described under No. 300 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(g) केनोपनिषत्.

KĒNŌPANIṢAD.

Foll. 14*b*—15*b*.

Same work as that described under No. 376 of the D.C.S. MSS., Vol. I, Part III.

Complete

R. No. **1896.**

Paper. 12⅜ × 7½ inches. Foll. 12. Lines, 16 in a page. Dēvanāgarī. Good.

Presented in 1915-16 by M.R Ry. V. Prabhākara Śāstri of Pedakallepalli.

सिद्धान्तलेशसङ्ग्रहव्याख्या—कृष्णालङ्कारा.

SIDDHĀNTALĒŚASAṄGRAHAVYĀKHYĀ: KṚṢṆĀLAṄKĀRĀ.

By Acyutakṛṣṇānandatīrtha, disciple of Svayamprakāśānandasarasvatī. Same work as that described under No. 4768 of the D.C.S. MSS., Vol. IX, wherein see for the beginning.

Complete.

End:

मुक्तस्येश्वरभावापत्तिमुपपादितामुपसंहरति——तस्मादिति । उदाहृतश्रुति-सूत्रभाष्यादिस्वारस्यादित्यर्थः । अवरोधित्वमैश्वर्यविशेषणम् । तदनुगुणेति । ऐश्वर्यानुगुणेत्यर्थः । समृद्धत्वमीश्वरभावापत्तिविशेषणम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वतीदिव्यश्रीचरणारविन्दसंलग्नरजोभूतस्य अच्युतकृष्णानन्दतीर्थस्य कृतौ शास्त्रसिद्धान्तलेशसङ्ग्रहव्याख्यायां श्रीकृष्णालङ्काराख्यायां चतुर्थः परिच्छेदः समाप्तः ॥

श्रीकृष्णचरणद्वन्द्वे स्मर्तृणां मङ्गलप्रदे ।
योगिध्येये कृतिरियमलङ्कारार्थमर्पिता ॥
श्रीकृष्णं मनसा ध्यात्वा श्रीकृष्णं संप्रणम्य च ।
व्याख्यातोऽयं परिच्छेदः श्रीकृष्णपरितुष्टये ॥

R. No. **1897**.

Paper. $10\frac{1}{2} \times 4\frac{3}{4}$ inches. Foll. 107. Lines, 12 in a page. Dēvanāgarī. Good.

Presented in 1915-16 by M.R.Ry. V. Prabhākara Śāstri of Pedakal̤l̤epalli.

भगवद्गीताभाष्यटीका.

BHAGAVADGĪTĀBHĀṢYAṬĪKĀ.

By Ānandagiri. Same work as that described under No. 2055 of the D.C.S. MSS., Vol. IV, Part I.

Breaks off in the fifth Adhyāya.

R. No. **1898**.

Paper. 12×6 inches. Foll. 13. Lines, 13 in a page. Dēvanāgarī. Good.

Presented in 1915-16 by M.R.Ry. V. Prabhākara Śāstri of Pedakal̤l̤epalli.

वेदान्तसंज्ञानिरूपणम्.

VĒDĀNTASAMJÑĀNIRŪPAṆAM.

Same work as that described under R. No. 1719(*b*) *ante*.

Complete.

R. No. **1899.**

Paper. 11¼ × 5¾ inches. Foll. 24. Lines, 16 in a page. Dēvanāgarī. Good.

Presented in 1915-16 by M.R.Ry. V. Prabhākara Śāstri of Pedakallepalli.

शब्दकौस्तुभः.

ŚABDAKAUSTUBHAḤ.

By Bhattōjidīkṣita. Same work as that described under No. 1324 of the D.C.S. MSS., Vol. III.

Contains the Āhnikas three and four in the first Pāda of the first Adhyāya.

The MS. is said to have been copied by Sāmbaśiva, son of Subba Śāstri and grandson of Gonkalla Śēṣādri Sāstri.

R. No. **1900.**

Paper. 9½ × 6 inches. Foll. 12. Lines, 12 in a page. Dēvanāgarī. Good.

Presented in 1915-16 by M.R.Ry. V. Prabhākara Śāstri of Pedakallepalli.

पञ्चदशी, सव्याख्या.

PAÑCADAŚĪ WITH COMMENTARY.

The text and the commentary are by Vidyāraṇya and Rāmakṛṣṇa respectively. Same work as that described under No. 4615 of the D.C.S. MSS., Vol. IX.

Wants the beginning; otherwise complete in the Tṛptidīpa.

R. No. **1901.**

Paper. 10½ × 4¾ inches. Foll. 18. Lines, 13 in a page. Dēvanāgarī. Slightly injured.

Presented in 1915-16 by M.R.Ry. V. Prabhākara Śāstri of Pedakallepalli.

सिद्धान्तकौमुदी.

SIDDHĀNTAKAUMUDĪ.

By Bhaṭṭōjidīkṣita. Same work as that described under No. 1354 of the D.C.S. MSS., Vol. III.

Contains up to the Svādisandhi.

R. No. **1902.**

Paper. 12 × 5 inches. Foll. 65. Lines, 7 in a page. Dēvanāgarī. Much injured.

Presented in 1915-16 by M.R.Ry. V. Prabhākara Śāstri of Pedakallepalli.

सारस्वतप्रक्रिया.
SĀRASVATAPRAKRIYĀ.

By Anubhūtisvarūpācārya. Same work as that described under No. 1546 of the D.C.S. MSS., Vol. III.

Complete.

R. No. **1903**.

Paper. $12\frac{1}{4} \times 6$ inches. Foll. 59. Lines, 12 in a page. Dēvanāgarī. Good.

